


॥ श्रीसीतारामचन्द्राभ्यां नमः ॥
॥ श्रीमते रामानन्दाचार्याय नमः ॥
॥ श्रीमद्गोस्वामितुलसीदासाय नमः ॥
॥ श्रीमते अग्रदेवाचार्याय नमः ॥

॥ ब्रह्म विरचितं रामस्तोत्रम् ॥

This text has been prepared by
Vishal Pandey (B.Tech IIT Kanpur)
with the blessings of
Chitrakūṭa Tulasīpīṭhādhiśvara
Jagadguru Rāmānandāchārya
Śrī Svāmī Rāmabhadrāchārya

सीतानाथ समारम्भां रामानन्दार्य मध्यमाम् ।
अस्मदाचार्य पर्यन्तां वन्दे श्री गुरु परम्पराम् ॥

ब्रह्म विरचितं रामस्तोत्रम्

दिनकरकुलकेतुः सर्व सौन्दर्यसेतुः त्रिभुवनसुखहेतुर्भूतिकृज्जम्भजेतुः ।
सुरनरनगरामानन्दसन्दोहधामा धृतमणिवरदामा पातु वो रामनामा ॥ १ ॥

दुरितहरणदक्षः साधुवर्यैकपक्षस्त्रिदशरिपुविपक्षः स्वर्गसंपत्तिरक्षः ।
प्रबलनिखिलरक्षः संहृतौ बद्धकक्षः सकलगुणवलक्षः पातु रामो विचक्षः ॥ २ ॥

नतिनुतिलवमन्ता कालभीत्येकहन्ता परमगहनगन्ता सत्यवाक्यानुमन्ता ।
कुशलनिधिरनन्तानन्दलीलैकरन्ता जयति जय दुरन्तापत्तिहृद्रामचन्द्रः ॥ ३ ॥

परममधुरशीलः प्रावृषेण्याभ्रनीलः सकलसुखदलीलः कृत्तहृच्छोककीलः ।
त्रिभुवनशुभवेशः कोटिकल्याणदेशः कुटिलमसृणकेशः पातु भास्वत्कुलेशः ॥ ४ ॥

सलिलनिधिगभीरः सर्वलोकैकवीरः स्थिरतरमतिधीरः सूर्यवंशैकहीरः ।
सुरभियश उशीरः स्वर्णवर्णाच्छचीरः श्रितविपिनकुटीरः पातु नो रामवीरः ॥ ५ ॥

त्रिभुवनजनपालः सर्वदुष्टैककालः करकृतकरवालः कीर्त्तिलक्ष्मीविशालः ।
समरभुवि करालः सत्तपस्वी जटालः कलयतु रघुबालः संपदं नो रसालः ॥ ६ ॥

मुनिजनकृतभक्तिर्बद्धसीतानुरक्तिः कलितललितशक्तिर्जातसंपद्विरक्तिः ।
कृत्तसकलविभुक्तिः सच्चिदानन्दभुक्तिर्दितिजहरणयुक्तिः पातु रामः सदुक्तिः ॥ ७ ॥

गुणनिधिरभिरामः सर्वरक्षोविरामः समरभुवि सभामः सौभगश्रीललामः ।
निरवधिशुभधामः श्रीदृशोर्दत्तकामः स्फुटमधुरिमवामः पातु वः सोऽपि रामः ॥ ८ ॥

॥ इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे
ब्रह्मविरचित स्तोत्रं नाम प्रथमोऽध्यायः ॥